
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

M-476

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M 476 विषय धर्मशास्त्र

नांव श्राद्धसंकल्प MSS

लेखक/लिपीकार आपाजी केशव सातपुते

पृष्ठ २२

काळ शके १८३९ पूर्ण/~~अपूर्ण~~

Checked 2012

M-476

॥ अथश्राद्धसंकल्पप्रारंभः ॥

M-476

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M 476 विषय धर्मशास्त्र
नांव श्राद्धसंकल्प MSS
लेखक/लिपीकार आपाजी केशव सानपुते
पृष्ठ 22
काल शके 1839 पूर्ण/अपूर्ण

M-476

Checked 2012

२

२

श्रीगणेशायनमः॥ अचम्य॥ केशवादिचतुर्विंशतिनामभिः॥ पवित्रे धृत्वा॥
पवित्रेवंतुःपरिवाचमासलेपितेषांप्रत्नोऽ अभिरक्षतिव्रतं॥ महः सेमुद्रंव
रुणारित्तिरोदधेधीराजइछेकुरुघरुणेष्वारभं॥ सहस्त्रधारेवलेसमस्वरं
दिवोनाकेमधूजिव्हाअसश्वतः॥ अरन्यस्पशोननिमीषंतिभूर्णयः पदेपदे
पाशिनःसंतिशेतवः॥ ऊर्ध्वकेशीविरुपाक्षीमांसशोणितभोजने॥ तिष्ठ
देवीशिखाबंधेचामुंडेह्यपराजिते॥ अपक्रामंतुभूतानिपिशाच्याःसर्वतो
दिशं॥ सर्वेषामविरोधेनश्राद्धकर्मसमारभेत्॥ शिखायज्ञोपवीतकटी॥
धर्भधारणं॥ प्राणायामः॥ पित्रदेवताभ्योनमः॥ विष्णवेनमः॥ वि॥ वि॥
विष्णोर्विष्णुःश्रीमद्भगवतामहापुरुषस्यविष्णोराज्ञयाः॥ प्रवर्तमानस्य
अद्यब्रम्हणोद्वितियेपरार्धेविष्णुपदेश्रीश्वेतवाराहकल्पेवैवस्वतमन्वं

श्रा० ॥२॥

नरे कलियुगे प्रथमचरणे भरतवर्षे भरतखंडे जंबुद्वीपे दंडकारण्ये देशे गोदा सं०
वर्याः दक्षिणे तीरे कृष्णावेण्योः उत्तरे तीरे शालिवाहन शके अमुकनाम संव
त्सरे अमुक अयने अमुक ऋतौ अमुक मासे अमुक पक्षे अमुक तिथौ अमु
क वासरे अमुक दिवस नक्षत्रे अमुक राशि स्थिते चंद्रे अमुक योगे अमुक कर
णे अमुक महानक्षत्रे अमुक राशि स्थिते श्री सूर्ये अमुक स्थिते देवगुरौ शेषेषु
गृहेषु यथा यथा राशि स्थानानि स्थितेषु सत्सु एवं गुणविशेषण विशिष्टायां शुभ
पुण्यतिथौ मम आत्मनः श्रुति स्मृति पुराणोक्त फल प्राप्त्यर्थं ॥ पुरूरवा द्रव सं
ज्ञिकानां विश्वेषां देवानां ॥ प्राचीनावीती ॥ अस्मत् पितृ पितामह प्रपिताम
हानां ॥ अमुक शर्मणां ॥ अमुक गोत्राणां ॥ वसुरुद्रादित्य स्वरूपाणां ॥ स ॥२॥
व्यं ॥ एतेषां श्रेयार्थं मोक्षार्थं तृप्त्यर्थं ॥ मम पितुः प्रतिसांवत्सरिक श्राद्धं स

दैवं सपिंडं साग्नौ कर्णं पार्वणेन कोदिष्ठेन विधिना अन्नेन हविषा सद्यः करिष्ये ॥
कुरुष्व ॥ तदंगतिलोदक यवोदक ब्राम्हण वर्णनं च करिष्ये ॥ ॐ इमं मे गंगे
यमुने सरस्वति शुतुद्रि स्तोमं सचता परुष्ण्या ॥ आसिक्न्या मरुद्वृधे वितस्त
यार्जीकीये शृणुह्या सुषोमया ॥ शरासः कुशरासो दर्भासः सैर्यउता ॥ मौं
जा ऽ अदृष्टा वैरिणाः सर्वे साकं न्यलिप्सत ॥ यवोसि धान्यराजो वा वारुणो
मधुसंयुतः ॥ निर्णोदिः सर्वपापानां पवित्रं ऋषिभिः स्मृतं ॥ तिलोसि सोमदेव
त्यो गोसवे देवनिर्मितः ॥ प्रत्नवद्भिः प्रत्नस्वधया पितृन्निमान्लोकान्प्रीणयाहि
नः स्वधा नमः ॥ गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं ॥ ईश्वरीं सर्वभूतानां
तामिहोपव्हये श्रियं ॥ हिरण्यरूपः सहिरण्यसंदृगपां नपात्सेदु हिरण्यवर्णः ॥
हिरण्ययात्परि योनेर्निषद्या हिरण्यदा ददत्यन्नमस्मै ॥ याः फलिनीर्या ऽ अफ

श्रा० लाऽअपुष्पा याश्च पुष्पिणीः ॥ बृहस्पतिप्रसूतास्ता नो मुंचंत्वंहसः ॥ सहिर सं०
॥ २ ॥ त्नानि दाशुषे सुवाति सविता भगः ॥ तं भागं चित्रमीमहे ॥ यवोदकतिलो
दकदेवताभ्यः ॥ इदं गंध तुलसीपत्रं भृंगिराजपत्रं सर्वोपचाराः ॥ य
वतिलैः सहिरण्यैः सफलैः संपूर्णाः संतु ॥ आत्मशुद्ध्यर्थं गृहभांडभा
श्राद्धविचारे जनशुद्ध्यर्थं प्रायश्चित्तसूक्तजाप्यमहं करिष्ये ॥ सहस्रशीर्षा० ॥ तरत्स
मंदी धावति धारा सुतस्यांधसः ॥ तरत्समंदी धावति ॥ उस्रा वेद वसू
नां मर्तस्य देव्यवसः ॥ तरत्समंदी० ॥ ध्वस्रयोः पुरुषंत्योरा सहस्राणि द
द्महे ॥ तरत्समंदी० ॥ आ ययोस्त्रिंशतं तना सहस्राणि च दद्महे ॥ तरत्सम
दी० ॥ हंसः शुचिषद्वसुरंतरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ॥ नृषद्व ॥ १ ॥
रसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं ॥ तत्वायामि

ब्म्हणा वंदमानस्तदाशास्ते यजमानो हविर्भिः ॥ अहेळमानो वरुणेह बो
ध्युरुशंस मान ऽ आयुः प्रमोषीः ॥ यत्किंचेदं वरुण दैव्ये जनेभिद्रोहं मनुष्या इ
श्चरामसि ॥ अचित्ती यत्तव धर्मा युयोपिम मानस्तस्मादेनसो देवरीरिषः ॥ ओं
तत्सवितु ॥ शुचीवो हव्या मरुतः शुचीनां शुचिं हिनोम्यध्वरं शुचिभ्यः ॥
ऋतेन सत्यमृतसाप ऽ आयंछुचिजन्मानः शुचयः पावकाः ॥ अग्निः शुचिव्र
ततमः शुचिर्विप्रः शुचिः कविः ॥ शुचीरोचत ऽ आहुतः ॥ उदग्ने शुचयः
स्तव शुक्राभ्राजंत ऽ ईरते ॥ तव ज्योतींष्यर्चयः ॥ एतोन्विंद्रं स्तवाम शुद्धं शु
द्धेन साम्ना ॥ शुद्धैरुक्थैर्वावृध्वांसं शुद्ध ऽ आशीर्वान्ममत्तु ॥ इंद्र शुद्धो
न ऽ आगहि शुद्धः शुद्धाभीरूतिभीः ॥ शुद्धो रयिंनिधारय शुद्धो ममद्धि सो
म्यः ॥ इंद्र शुद्धो हि नो रयिं शुद्धो रत्नानि दाशुषे ॥ शुद्धो वृत्राणि जिघ्नसे शु

स्ना० द्रो वाजंसिषासासि॥ मार्जनं॥ ॐअपवित्रःपवित्रोवासर्वावस्थांगतापिवा॥ सं०
॥६॥ यस्मरेत्पुंडरीकाक्षंसबाह्याभ्यंतरशुचिः॥सर्वैस्थानशुचीयोभवं
तु॥ अस्तुशुचिवस्तु॥ ब्रम्हदंडार्थंसलिलंकुशांहिरण्यंवानिक्षिप्य॥ ब्राम्ह
णानांप्रदक्षिणात्रयंकुर्यात्॥ समस्तसंपत्समवाप्तिहेतवःसमुत्थि
तापत्कुलधूमकेतवः॥ अपारसंसारसमुद्रसेतवःपुनंतुमां ब्राम्हणपाद
पांसवः॥ आपद्घनध्वांतसहस्रभानवःसमीहितार्थार्पणकामधेनवः॥
समस्ततीर्थांबुपवित्रमूर्तयोरक्षंतुमांब्राम्हणपादपांसवः॥ विप्रोघप
दर्शनात्क्षिप्रंक्षीयंतेपापराशयः॥ वंदनान्मंगलावाप्तिरर्चनादच्युतंपदं॥
आधिव्याधिहरंनृणांमृत्युदारिद्र्यनाशनं॥ श्रीपुष्टिकीर्तिदंवंदेविप्रश्री ॥६॥
पादपंकजं॥ यावतीर्वैदेवतास्ताःसर्वावेदविदिब्राम्हणेषुसंस्थितास्मा

ब्राम्हणेभ्यो वेदविद्भ्यो दिवे दिवे नमस्कुर्यात्तान्श्लोकं कीर्तयेदेता एव देवताः

प्रीणाति॥ त्रिः प्रदक्षिणा द्वौ नमस्कारौ कृत्वा॥ प्राचिनाविती॥ अपसव्य अक्रोधनैः

शौचपरैः सततं ब्रम्हचारिभिः॥ भवितव्यं भवद्भिश्च मयाच श्राद्धकारिणा॥ अ

द्यतिथौ मम पितुः मातिसांवत्सरिक श्राद्धं कर्तुं मम अधिकारसंपदस्त्विति भ

वंतो ब्रुवंतु॥ अस्तु श्राद्धादिकारसंपत॥ सव्यं॥ कालस्य मुख्यकालोऽस्त्वि

ति भवंतो बुवंतु॥ कालस्य मुख्यकालोस्तु॥ पाकादिनां हाविर्योग्यतास्त्विति भ

वंतो ब्रुवंतु॥ पाकादिनां हविर्योग्यतास्तु॥ नमो देवेभ्यः॥ प्राचीनाविति॥ स्वधा

पितृभ्यः॥ सव्यं॥ पुरुरवार्द्रवसञ्ज्ञिकविश्वेदेवस्थाने क्षनणं दत्वा॥ भवद्भिः प्रसा

दः कर्तव्यः॥ सुकर्तव्यः॥ प्राचीनावीति॥ अस्मत्पितृ पितामह प्रपितामहस्थाने

क्षनणं दत्वा॥ त्रीन ब्राम्हण असत्यास॥ पितृस्थाने क्षनणं दत्वा॥ पितामहस्थाने क्ष०

 प्रपितामहस्थाने दत्त ॥ भवद्भिः प्रसादः कर्तव्यः ॥ सुकर्तव्यः ॥ सव्यं ॥ सर्वेषां
 स्वागतं ॥ सुस्वागतं ॥ [पुरूरवार्द्रव संज्ञिकाः विश्वेदेवाः ॥ पाद्यस्थाने अत्रं नमः ॥
गंधं नमः ॥ यवादनतपुष्पं नमः ॥ सर्वे उपचाराः यवैः संपुर्णाः संतु ॥ पुरूरवार्द्रव सं
ज्ञिकाः ॥ विश्वेदेवाः ॥ ब्रम्हणे इदं वः पाद्यं ॥ सुपाद्यं ॥ शन्नोदेवीरभिष्टय ऽआ
पोभवंतुपीतये ॥ शंयोरभिस्रवंतुनः ॥ एवं द्विति स्रदेवा ॥ प्राचीनावीति ॥ अ
स्मत्पितृपितामहप्रपितामहाः ॥ पाद्यस्थाने अत्रं नमः ॥ गंधं नमः ॥ तिल
दनतपुष्पं नमः ॥ सर्वे उपचाराः तिलैः संपुर्णाः संतु ॥ अस्मत्पितृपितामहप्रपि
तामहाः ॥ अमुकशर्मणाः अमुकगोत्राः वसुरुद्रादित्यस्वरूपाः ॥ ब्रम्हणे इदं
वः पाद्यं इतित्रिः ॥ सुपाद्यं ॥ शन्नोदेवी० ॥ यजमानो ॥ हस्तौ पादौ प्रक्षाल्य
पवित्रं विसृज्य ॥ आचम्य ॥ पवित्रं ते वितंतं ब्रम्हणस्पते प्रभुगात्राणि पर्यै

षिविश्वतः ॥ ओं तंसततनूनतिदामोऽ ओं श्नुतेश्नृतासुज्झद्दहं नुस्ततसमाश
तः ॥] पुरूरवार्द्रवसंज्ञिकाः विश्वेदेवाः ॥ स्माछवं ॥ सुस्मास्महे ॥ प्राचीनावि
ती ॥ अस्मत्पितृपितामहः प्रपितामहः स्माछवं ॥ सुस्मास्महे ॥ सव्यं ॥ उपक्रां
तं मम पितुः प्रतिसांवत्सरिकश्राद्धाख्यं कर्म करिष्ये ॥ कुरुष्व ॥ प्राची० ॥ पि
तृतीर्थेन श्राद्धस्य कर्मणः सिद्धिरस्त्विति भवंतो ब्रुवंतु ॥ अस्तु श्राद्धस्य कर्म
णः सिद्धिः ॥ सव्यं ॥ विश्वेषां देवानां श्राद्धस्य कर्मणः सिद्धिरस्त्विति भवंतो
ब्रुवंतु ॥ अस्तु श्राद्धस्य कर्मणः सिद्धिः ॥ अपाहता असुरा रक्षांसि पिशाचा
ये क्षयंति पृथिवीमनु ॥ अन्यत्रेतो गच्छंतु यत्रैषां गतं मनः ॥ प्राचीना० ॥ तिल
रक्षांत्वसुरां दर्भा दर्भरक्षांतु राक्षसान् ॥ पंक्तिं वै श्रोत्रियो रक्षेदतिथिः सर्वर
मा जी क्षकः ॥ स्फुरक्षकः ॥ रक्षोहणं वाजिनं घार्मिमित्रं प्रतिष्ठमुपयामि शर्मणि

श्रा० शिशानो अग्निः क्रतुभिः समिद्धः स नो दिवा स रिषः पातु नक्तं ॥ अष्टौ वसव सं०
॥ ६ ॥ एकादश रुद्रा द्वादशादित्याः श्राद्धद्वारे वैष्णविरक्षनागयेयं भूमिः ॥ उदीरताम
वर उत्परास उन्मध्यमाः पितरः सोम्यासः ॥ असुं य ईयुरवृका ऋत
ज्ञास्ते नो वंतु पितरो हवेषु ॥ अष्टदिशे सलिलटाकावे अगच्छंतु श्राद्धका
ले पितृपितामहप्रपितामहाः ॥ सव्येन विश्वेदेवैः सह ॥ पूर्वस्निय वटाकावे
पाकप्रोक्षणं ॥ त्रिभिष्ठुं देवसवितर्वर्षिष्ठैर्देव मन्मभिः ॥ अग्ने दक्षैः पुनीहि
मा ॥ पुनंतु मां देवजनाः ॥ पुनंतु वस्व बोधिया ॥ विश्वेदेवाः पुनीत मा जातवे
दः पुनीहि मा ॥ प्रप्यायस्व प्रस्यंदस्व सोम विश्वेभिरंशुभिः ॥ देवेभ्य उत्तमं ह
विः ॥ गायत्र्यादि पाकादीनां पवित्रतास्तु ॥ सर्वे पाकाः शुचयो भवंतु ॥ पाकप्रो ॥ ६ ॥
क्षणविधिर्वतू अस्तु पाकविधिर्वतू ॥ आगच्छंतु महाभागा विश्वेदेवा महाब

लाः॥ येस्मत्रविहिताश्राध्देसावधानाभवंतुते॥ भवामः॥ प्राची०॥ श्राध्दभूमौ
गयांध्यात्वाध्यात्वादेवंगदाधरं॥ वरुणादींश्चपितॄंध्यात्वाततःश्राद्धंप्रवर्तते॥
प्रवर्तया॥ सव्यं॥ आपोदत्वा॥ पुरुर्वाद्रवसंज्ञिकानांविश्वेषांदेवानांब्रह्मणेइ
दमासनं॥ स्वासनं॥ अत्रास्यतांधर्मोसिआपः॥ पितुःप्रतिसांवत्सरिकश्रा
द्धेदेवेक्षणःक्रीयतां॥ ॐ तथा प्राप्नोन्द्वान्॥ प्राप्नुवानि॥ अर्घ्यमासाद्य॥
पात्राणिनिधाय॥ गायत्र्याप्रोक्ष्य॥ उध्दृत्य पुनःप्रोक्ष्य॥ पुर्वाग्निकूर्चंनिधाय॥
किंचित्उदकमासिच्य॥ शन्नोदेवी०॥ यवोसिधान्यराजोवावारुणोमधुसंयु
तः॥ निर्णोदिःसर्वपापानांपवित्रमृषिभिःस्मृतं॥ यवान्विकीर्य॥ देवअर्घ्यपात्र
योः अत्रंनमः गंधंनमः यवाक्षतपुष्पंनमः॥ सर्वेउपच्याराः यवैसंपुर्णासंतु॥
न् पुरुर्वार्द्रवसंज्ञिकान्विश्वान्देवान्भवत्सुयथायथंआवाहयिष्ये॥ आवाहय॥

श्रा० विश्वेदेवासआगतशृणुतामऽइमंहवं॥ एदंबर्हिर्निषीदता॥ पुरुवर्द्रिवसं सं०
॥ ७ ॥ ज्ञिकान्विश्वान्देवान्अवाहयामि॥ विश्वेदेवाः शृणुतेमंहवंमेयऽअंत
रिक्षेयऽउपद्यविष्ठ॥ येऽअग्निजिव्हाऽउतवायजत्रा आसद्यास्मिन्ब
र्हिषीमादयध्वं॥ देवअर्घ्यपात्रेसंपन्ने॥ सुसंपन्ने॥ स्वाहा अर्घ्या॥ संत्वर्घ्या॥
हस्तार्चनविधेसर्वस्यउदकेनपरिपुर्णता॥ अपोदत्वा॥ पवित्रेदत्वा॥ पुरुवर्द्रि
वसंज्ञिकांविश्वांदेवान् ब्रम्हणेइदंवोअर्घ्यं॥ स्वाहा अस्त्वर्घ्यं॥ यादिव्याआ
पःपृथिविसंबभूवुर्याअंतरिक्षाउतपार्थिवीर्याः॥ हिरण्यवर्णायज्ञियास्ता
नअपःशंस्योनाभवंतु॥ इदमर्घ्यंदत्तंनमम॥ अस्तुदत्तं॥ पुरुवर्द्रिव०
देवाः॥ यथाभागशाअमीवोगंधः॥ सुगंधः॥ स्वाहानमोनमम॥ पुरुव० ॥ ७ ॥
देवाः॥ माल्यार्थेइमानिपुष्पाणि॥ तुलसिदलसहितानि॥ स्वाहानमोनमम॥

पुरुर्वार्द्रिवं॰देवाः॥ यथाभागश॥ एषवोधूपाः॥ सुधुपः॥ स्वाहानमोनमम॥
पुरुर्वार्द्रिवं॰देवाः॥ यथा॰ एषवोदिपः॥ सुदिपः॥ स्वाहान॰॥ पुरुर्वार्द्रिवं॰
देवाः॥ आछादनार्थेवस्त्रनिष्क्रयद्रव्यं॥ आस्त्वाछादनं॥ स्वाहा॰॥ अ
नुलेपनार्थेगोपिचंदनं॥ सुचंदनं॥ धारणार्थेयज्ञोपवितं॥ सुपवितं॥ स्वा
हान॰॥ फलार्थेपूगफलं॥ सुफलं॥ स्वाहान॰॥ पवित्रार्थेइमौकुशौ॥
अस्तुपवित्रकं॥ भत्येकं स्वाहानमोनमम॥ युवासुवासाःपरिवितआ
गात्सउश्रेयान्भवतिजायमानः॥ तंधीरासः कवयउन्नयंतिस्वाध्योइ
मनसादेवयंतः॥ नमोदेवेभ्यः आसनाद्यत्रगंधपत्रपुष्पधुपादिपआछाद
नांतःपंचोपचाराःसर्वेपरीपूर्णाभवंतु॥ अर्चनविधेस्वर्चितमस्तु॥ न्युनंद्वि
धिवदस्तु॥ अस्तुविधिवत्॥ यस्यस्मृत्याचनामोक्त्यातपोयज्ञःक्रिया

श्रा० दिषु॥ न्युनं संपूर्णतां यांति सद्यो वंदे तमच्युतं॥ अच्युताय नमः॥ गयाय नमः॥ सं०
॥ ८ ॥ गदाधराय नमः॥ पुंडरीकाक्षाय नमः॥ काशीविश्वेश्वराय नमः॥ युष्मदनु
ज्ञेया पित्राद्यर्चनं करिष्ये॥ कुरुष्व॥ प्राचीनावीती॥ आपो दत्वा॥ अस्मत्
पित्रपितामहप्रपितामहानां॥ अमुकशर्मणां अमुकगोत्राणां वसुरुद्रा
दित्यस्वरुपाणां॥ ब्रम्हणे इदमासनं॥ सुवासनं॥ अत्रास्यतां धर्मोसि ज्ञा
पः पितुः प्रतिसांवत्सरिकश्राद्धे पित्रे क्षणः क्रीयतां॥ ॐ तथा प्राप्नोतु भ
वान् प्राप्नुवानि॥ [अ]र्घ्यमासाद्य॥ पात्राणि निधाय॥ ग॥ पव्यात्रोक्ष्य॥ उद्धृत्य॥
पुनः प्रोक्ष्य॥ दक्षिणाग्र कूर्चं निधाय॥ किंचोदकमासिच्य॥ शन्नोदेवीरित्य
भिमंत्र्य॥ तिलान्विकिर्य॥ तिलोसि सोमदेवत्यो गोसवे देवनिर्मितः॥ प्रत्न ॥ ८ ॥
वद्भिः प्रत्नस्वधया पितृं निमांल्लोकान्प्रीणयाहि नः स्वाधा नमः॥ इति मंत्रेण

पृथक्पात्राणि तानि विकीर्य ॥ पितृअर्घ्यपात्रयोः इदं गंध तुलसीपत्रं भृंगि
राजपत्रं मुनिपुष्पं च ॥ सर्वेउपचाराः तिलैः संपूर्णाः संतु ॥ अस्मत्पितृपि
तामहप्रपितामहान् ॥ वसुरुद्रादित्यस्वरूपान् ॥ भवन्तु यथायथं आवाहिष्ये ॥
आवाहय ॥ ॐ उशंतस्त्वा निधीमह्युशंतः समिधीमहि ॥ ॐ उशन्नुशत ऽआवह
पितॄन्हविषे ऽअत्तवे ॥ अस्मत्पितृपि० महान० अमुकशर्मन् अमुकगोत्रान्
वसुरुद्रादित्यस्वरूपान् ॥ आवाहयामि ॥ आवाहय ॥ अयंतुनः पितरः सोम्या
सोऽग्निष्वात्ताः पथिभिर्देवयानैः ॥ अस्मिन्यज्ञे स्वधया मदंतोधिब्रुवंतु तेवं
त्वस्मान् ॥ पितृअर्घ्यपात्राणि संपन्नानि ॥ सुसंपन्नानि ॥ स्वधा ॥ अर्घ्याः सं
त्वर्घ्याः ॥ हस्तार्चनविधेः सर्वस्यउदकेन परिपूर्णता ॥ आपो देवा ॥ पवित्रेद
त्वा ॥ अस्मत्पितर इदं ते अर्घ्यं स्वधा स्वर्घ्यं ॥ अस्मत्पितामहेदं ते अर्घ्यं स्व

श्रा० धास्त्वर्घ्यं॥ अस्मत्प्रपितामहेदंतेअर्घ्यंस्वधास्त्वर्घ्यं॥ अस्त्वर्घ्यं॥ या सं०
॥ ९ ॥ दिव्याआपःपृथिविसंबभूवुर्यान्तरिक्ष्याउतपार्थिवीर्याः॥ हिरण्यवर्णा
यज्ञियास्तानअपःशंस्योनाभवंतु इदमर्घ्यंदत्तंनमम॥ अस्तुदत्तं॥ स्थान
मसीप्राणिलायैनमः॥ इदमासनं॥ पितृणांस्वधेयंस्थानमसि॥ स्थानस्थी
तपितरः॥ इदंगंधतुलसीपत्रंभृंगीराजपत्रंसर्वेउपचाराःतिरैःसंपूर्णाः
संतु॥ स्थानमसिप्रच्छाद्य सव्यंसंस्त्रवांस्तमवनीयताभिरद्भिःपुत्रका
मोमुखमनक्ति॥ पुत्रवान्भव॥ नेत्रस्पर्शनं॥]अस्मत्पीता॥ अमुकश
र्मणः अमुकगोत्राः वसुरुद्रादित्यस्वरूपाःयथाभागश॥ अमिवोगंधः॥ सुगंधाः॥
स्वधानमोनमम॥ अस्मत्पि०स्वरूपाः॥ पुजार्थेयथाकालोद्भवपुष्पंतुलसीप ॥ ९ ॥
त्रंभृंगिराजपत्रं॥ सुपुष्पंसुपत्रं॥ स्वधानमोनमम॥ धूरसिधूर्वधूर्वंतंधू

रत्नंयोऽस्मान्॥धूर्वतिलंवयंवयंधुर्वामहाः॥पुजार्थेएषवोधुपः॥स्त्रधूपा॥

स्वधानमोनमम॥उद्दीप्यस्वजालवेदोपघ्नन्नीररितीमम॥पशूंश्चमह्यमा

वह्जीवनंचदिशोदिश॥अस्मत्पि०स्वरुपाः॥यथाभागशाएषवोदिपाः॥

स्त्रदिपः॥स्वधानमोनमम॥अस्मत्पित्र०स्वरुपाः॥अच्छादनार्थेवस्त्रनि

ष्कयद्द्रव्यं॥अस्त्वाच्छादनं॥स्वधानमोनमम॥अनुलेपनार्थेगोपीचंदनं॥

सुचंदनं॥स्वधा०॥धारणार्थेयज्ञोपवीतं॥स्त्रपवीतं॥स्वधा०॥फलार्थेपुग

फलं॥सुफलं॥स्वाधा०॥पवित्रार्थेइमेकुशाः॥अस्तुपवित्रकं॥अत्येकंस्व

धानमोनमम॥इदंपितृभ्योनमोऽस्त्वद्ययेपूर्वासोयऽउपरासऽईयुः॥ये

पार्थिवेरजस्यानिषत्तायेवानूनंसुवृजनासुविक्षु॥नमःपितृभ्यः॥आसना

दिअत्रगंधपत्रपुष्पधुपदिपआच्छादनांताःपंचोपचाराः॥सर्वेपरिपुर्णाभवंतु॥

अर्चनविधेष्वर्च्चितमस्तु॥ न्यूनं सद्विधिवदस्तु॥ अस्तु विधिवत्॥ यस्य
॥१०॥ स्मृत्या च नामोक्त्यातपःपूजांक्रियादिषु॥ न्युनं संपूर्णतां यांति सद्यो वंदे तम
च्युतं॥ अच्युताय नमः॥ गयाय नमः॥ गदाधराय नमः॥ पुंडरिकाक्षाय नमः॥
काशीविश्वेश्वराय नमः॥ सव्यं॥ युष्मदनुज्ञेया मंडलादि पात्रासादनं च करि
ष्ये॥ कुरुष्व॥ [प्राचीना०॥ पिशंगभृष्टिमंभृणं पिशाचिमिंद्र संमृणा॥ सर्वं रक्षो
निर्बर्हय॥ सव्यं॥ रक्षोणो ऽ अग्ने तव रक्षणेभी रारक्षाणः सुमरव प्रीणानः॥
प्रतिष्फुर विरुज वीड्वंहो जहि रक्षो महि चिद्वावृधानं॥ ब्रह्म च ते जातवेदो न
मश्चेयं च गीः सदमिद्वर्धनी भूत्॥ रक्षोणो अग्ने तन यानि तो कारक्षो तन नस्त
न्वो॥ अप्रयुच्छन्॥ यथा विष्णुरच चक्रेण त्रैलोक्यं परिरक्षतु॥ भस्मना मंडलं
कुर्यात्॥ सर्वभुतानि रक्षन्तु॥ सर्वेषां पापदृष्टीनां चक्षुर्बध्नाति केशवः॥ एवं ॥१०॥

प्राचीनावीती

मंडलभस्मांकंपंक्तिदोषोनविद्यते॥ करसुद्धिः॥ जगृम्हातेदक्षिणंमिद्रहस्तं

वसुयवोवसुपतेवसुनां॥विद्माहित्वागोपतिंशुरगोनांमस्मभ्यंचित्रं वृषणं

रइंदोः॥सव्यं॥हस्तोच्युतेभिरद्रिभिसुतंसोमंपुनीतना॥मधावाधोवतामधु॥

मवत्सेवयाभवदनुक्तोयाविघ्नपाणायग्नौकरणंकरिष्ये॥ क्रियतांघृताक्तम

न्नमादाय॥ अन्नंद्विधाविभज्यं अपःसोमायपितृमतेद्दइदमग्नयेकव्यवाहा

नाय॥पात्रंस्थंअवत्तंन्याभिधार्य॥सोमायपितृमतेस्वधानमः॥सोमायपि

तृमतइदंनमम॥ अग्नयेकव्यवाहनायस्वधानमः॥अग्नयेकव्यवाहाना

येदंनमम॥ ॐ चमेस्वरश्चमेयज्ञोपचतेनमश्च॥ यत्तेन्युनंतस्मैतउपयत्ते

तिरिक्तंतस्मैतेनमः॥पाणौहुतं॥सुहुतं॥पात्रशुध्दि॥मुधनिंदिवोऽअर

तिंपृथिव्यावैश्वानरमृतऽआजातमग्निं॥कविंसंम्राजमतिथिंजनानामासं

श्रौ० न्तापात्रंजनयंतदेवाः॥देवपात्रे॥आमासुपक्वमैरयऽआसूर्यंरोहयोदिवि॥ सं०
॥११॥ घर्मंनसामंतपतासुवृक्तिभिर्जुष्टंगिर्वणसेबृहत्॥पितृपात्रे॥सोमोधेनुं
सोमोऽअर्वंतमाशुंसोमोवीरंकर्मण्यंददाति॥सादन्यंविदथ्यंसभेयंपितृ
श्रवणंयोददाशदस्मै॥उपह्वयेसुदुघांधेनुमेतांसुहस्तोगोधुगुतदोहदेनां॥
श्रेष्ठंसवंसवितासाविषन्नोभीद्धोघर्मस्तदुषुप्रवोचं॥हिंकृण्वतीवसुप
त्नीवसूनांवत्समिच्छंतीमनसाभ्यागात्॥दुहामश्विभ्यांपयोअघ्न्येयंसा
वर्धतांमहतेसौभगाय॥इंद्रदृह्ययामकोशाऽअभूवन्यज्ञायशिक्षगृणते
सखिभ्यः॥दुर्मर्यवोदुरेवामर्त्यासोनिषंगिणोरिपवोहंत्वासः॥वाशीमंत
ऋष्टिमंतोमनीषिणःसुधन्वानइषुमंतोनिषंगिणः॥स्वश्वास्थसुरथाःपृश्नि ॥११॥
मातरःस्वायुधामरुतोयाथनाशुभं॥चतुष्कपर्दायुवतिःसुपेशाघृतप्रतीकाव

युनो निवर्त्तते ॥ तस्यां सुपर्णा वृषणा निषेदतुर्यत्र देवा दधिरे भागधेयं ॥ एकः सुपर्णः
स समुद्रमाविवेश स इदं विश्वं भुवनं विचष्टे ॥ तं पाकेन मनसापश्यमन्तितस्तं मा
तारेळ्हि स उ रेळ्हि मातरं ॥ सुपर्णं विप्राः कवयो वचोभिरेकं सन्तं बहुधा कल्पयन्ति ॥
छंदांसि च दधतो अध्वरेषु ग्रहान्सोमस्य मिमते द्वादश ॥ ॥ पितुं नु स्तोषं म
हो धर्माणं तविषीं ॥ यस्य त्रितो व्योजसा वृत्रं विपर्वमर्दयत ॥
स्वादो पितो मधो पितो वयं त्वा ववृमहे ॥ अस्माकमविता भव ॥ उप नः पितवा च
र शिवः शिवाभिरूतिभिः ॥ मयोभुरद्विषेण्यः सखा सुशेवो अद्वयाः ॥ तव त्ये
पितो रसा रजांस्यनु विष्ठिताः ॥ दिवि वाता इव श्रिताः ॥ तव त्ये पितो ददतस्तव
स्वादिष्ठ ते पितो ॥ प्र स्वाद्मानो रसानां तुविग्रीवा इवेरते ॥ त्वे पितो महानां
देवानां मनो हितं ॥ अकारि चारु केतुना तवाहिमवसावधीत ॥ यददो पितो

अत्रो

श्रा० अजेगन्विवस्तुपर्वतानांगोचिभोमधोपितोरंभक्षनायगम्याः॥ यदपामोषधीनांपरि सं०

॥१२॥ शमारिशामहे॥ वातोपिपीवृद्धध्वा॥ यत्तेसोमगवाशिरोयवाशिरोभजामहे॥ वा

तो॥०॥ करंभ औषधेभववपिवौवृकउदारथिः॥ वातो॥०॥ तंत्वोवयंपितोवचोभि

र्गावोनहव्यासुषूदिम॥ देवेभ्यस्त्वासधमादमस्मभ्यंत्वासधमादं॥ कयानश्चि

त्र आभुवदूतीसदावृधःसखा॥ कयाशचिष्ठयावृता॥ कस्त्वासत्योमदानांमंहि

ष्ठोमत्सदंधसः॥ दृळ्हाचिदारुजेवसु॥ अभीषुणःसखीनामविताजरितॄणां॥

शतंभवास्यूतिभिः॥ ब्रह्मेमेतुमांमधुमेतुमां॥०॥ देवेभ्यःपितृभ्यश्चमहायोगिभ्य

एवच॥ नमःस्वाहायैस्वधायैनित्यमेवनमोनमः॥ सप्तव्याधादशारण्येमृगाःका

लंचनेगिरौ॥ चक्रवाकाःसरोद्वीपेहंसाःसरसिमानसे॥ तेपिजाताःकुरुक्षेत्रे ॥१२॥

ब्राह्मणावेदपारगाः॥ प्रस्थितादीर्घमध्वानंयूयंतेभ्योवसीदथ॥ अमूर्तानां

चमुर्तिनांपितॄणांदिप्ततेजसां॥ नमस्यामिसदातेषांध्यायिनांयोगचक्षुषां॥
चतुर्भिश्चचतुर्भिश्चद्वाभ्यांपंचभिरेवच॥ हूयतेचपुनर्द्वाभ्यांसमेविष्णुःप्र
सीदतु॥ ईशानःपितृरूपेणमहादेवोमहेश्वरः॥ प्रीयतांभगवानीशःपरमात्मा
सदाशिवः॥ [पात्रप्रोक्षणं॥ ओंभूर्भुवःस्वः॥ ओंतत्सवितुर्वरेण्यंभर्गोदेवस्य
धीमहि॥ धियोयोनःप्रचोदयात्॥ सत्यंत्वर्तेनपरिषिंचामि॥ पृथिवितेपात्रंद्यौ
पिधानंब्राम्हणस्यमुखेअमृतेअमृतंजुहोमिस्वाहा॥ ब्राम्हणानांत्वाविद्यावतांप्रा मां
णापानयोर्जुहोम्यक्षितमसिमामेषांक्षेष्ठाः॥ अत्रामुष्मिंल्लोके॥ अतोदेवाअवंतु
नोयतोविष्णुर्विचक्रमे॥ पृथिव्याःसप्तधामभिः॥ इदंतेअंनंविष्णोहव्यंरक्षस्व॥
विप्रांगुष्ठमुत्तमन्नेनिवेश्यइयंभूश्रीगयागदाधरोभोक्ताअहंब्रम्हअन्नंब्रम्ह
ब्राम्हणोब्रम्हब्राम्हणरत्वाहवनीयार्थेमनःकल्पितसुवर्णपात्रस्थितमिदमन्नम

श्रा० दिनर्च्ययवटच्छायेयं॥ पुरुवर्द्रिवसंज्ञिकेभ्यो विश्वेभ्योदेवेभ्यः॥ इदमिदमन्नं सं०
॥१३॥ सोपस्करंपरिविष्टंपरिवेक्ष्यमाणंच अस्य ब्राम्हणस्य आतृप्तेः तृप्तिपर्यंतंग
यस्थं अंमृतरूपेणसंपद्यतांस्वाहाहव्यंनमम॥ तत्सद्गयायांविष्णुपदादि
समस्तपदेषुदत्तमन्नमक्षय्यमस्तु॥ श्रीगयागदाधरः प्रीयतां॥ प्रीतोभवतु॥
एवंद्विलियदेवा॥ येदेवासोदिव्येकादशस्थपृथिव्यामध्येकादशस्थ॥ अप्सु
क्षितोमहिनैकादशस्थ तेदेवासोयज्ञमिमंजुषध्वं॥ नमोदेवेभ्यः यथासांकल्पि
तमन्नंप्रीयतां॥ देवानुज्ञेया॥ पित्र्यांलनिवेदनंकरिष्ये॥ प्राचीनावीती॥ तूष्णींप
रिषिच्य॥ पृथिवीतेपात्रंद्यौरपिधानंब्राम्हणस्यमुखेअमृतेअमृतं जुहोमिस्वाहा
ब्राम्हणानांत्वाविद्यावतांप्राणापानयोर्जुहोम्यक्षितमसिपितॄणांक्षेष्ठाः॥ अत्रा ॥१३॥
मुष्मिंल्लोके॥ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदं॥ समूढमस्यपांसुरे॥ अंगुष्ठमु

तमन्नेनिवेश्य॥ अस्मत्पितृपितामहप्रपितामहोदेवताइदंतेअन्नंविष्णोःक
व्यंरक्षस्व॥ इयंभूःश्रीगयागदाधरोभोक्ता अहंब्रम्हब्राम्हणोब्राम्हणा अ
म्हणस्त्वाकवनीयार्थेमनःकल्पितरजलपात्रस्थितमिदमन्नमक्षय्यवटच्छा
येयं॥ अस्मत्पितृपितामहप्रपितामहेभ्यः॥ अमुकशर्मभ्यः अमुकगोत्रेभ्यः
वसुरुद्रादित्यस्वरुपेभ्यः इदमिदमन्नंसोपस्करंपरिविष्टंपरिवेक्ष्यमाणंचअ
स्यब्राम्हणस्यआतृप्तेः तृप्तिपर्यंतंगयस्थंअमृतरूपेणसंपद्यतांस्वधाः
कव्यंनमम॥ तत्सद्गयायांविष्णुपदादिसमस्तपदेषुदत्तमन्नमक्षय्यमस्तु॥
गयागदाधरःप्रीयतां॥ प्रीतोभवतु॥ येचेहपितरोयेचनेहयांश्चविद्मयांउच
नप्रविद्म॥ त्वंवेत्थयतितेजातवेदःस्वधाभिर्यज्ञंसुकृतंजुषस्व॥ नमःपितृ
भ्यः यथासांकल्पितमन्नंप्रीयतां॥ मधुमतीश्रावयिष्ये॥ श्रावय॥ मधुवाता

ऽऋतायतेमधुक्षरंतिसिंधवः॥माध्वीर्नःसंत्वोषधीः॥मधुनक्तमुतोषसोम
॥२५॥ धुमत्पार्थिवंरजः॥मधुद्यौरस्तुनःपिता॥मधुमान्नोवनस्पतिर्मधुमाँऽअस्तुसू
र्यः॥माध्वीर्गावोभवंतुनः॥मधुमधु॥सुमधु॥सर्वान्नंमधु॥आऽइदमछिद्रमस्त्वि
तिभवंतोब्रुवंतु॥आऽइदमछिद्रंभवतु॥]ब्रम्हार्पणंब्रम्हहविर्ब्रम्हाग्नौब्रम्हणाहुतं॥
ब्रम्हैवतेनगंतव्यंब्रम्हकर्मसमाधिना॥हरिर्दाताहरिर्भोक्ताहरिरन्नंप्रजापतिः॥
हरिर्विप्रःशरीरस्थोभुंक्तेभोजयतेहरिः॥चतुर्भिश्चचतुर्भिश्चद्वाभ्यांपंचभिरेवच॥
हूयतेचपुनर्द्वाभ्यांसमेविष्णुःप्रसीदतु॥तत्सद्ब्रम्हार्पणमस्तु॥नैवेद्यंसमर्प्य॥नि
वीती॥ईशानविष्णुःकमलासनकार्तिकेयोवन्हित्रयार्करजनीशगणेश्वराणां॥
क्रौंचामरेंद्रकलशोद्भवकश्यपानांपादान्नमामिसततंपितृमुक्तिहेतून्॥गयाब्रम्ह ॥२५॥
गयाविष्णुगयारुद्रगयाकाशीविश्वेश्वरगया॥प्राचीना०॥एकोविष्णुर्महद्भूतंपृथग्भू

तांन्यनेकशः॥ त्रीन्लोकान्व्याप्यभूतात्माभुंक्तेविश्वभुगव्ययः॥ अनेनममपितुः

प्रतिसांवत्सरिकश्राद्धीयब्राम्हणभोजनेनभगवान्पितृपितामहप्रपितामहःस्वरू

पीजनार्दनवासुदेवप्रीयतांनमम॥ तत्सत्ब्रम्हार्पणमस्तु॥ सव्यं॥ देवाःतत्स

त्अमृतमस्तु॥ प्राचीना०॥ पितरःतत्सत्ब्रम्हार्पणमस्तु॥ सव्यं॥ यथासुखंजुष

ध्वं॥ अमृतंभुंजीत॥ प्राचीना०॥ पितृअपोशनंदत्वा॥ सव्यं॥ देवअपोशनंद

त्वा॥ अमृतऋषिःसत्योदेवता॥ गायत्रीछंदः॥ अमृतोपस्तर्णमसि॥ प्राणायस्वा

हा॥ अपानायस्वहा व्यानायस्वाहा उदानायस्वाहा समानायस्वाहा ब्रम्ह

णेस्वाहा प्राचीना० अपोदत्वा सव्यं अपोदत्वा दशगायत्रींजपेत्॥ अपे

क्षितंयाचितव्यंत्याज्यंचैवानपेक्षितं॥ उपविश्यसुखेनैवभोक्तव्यंस्वस्थमानसैः॥

विद्यमानशाकपाकपदार्थेषुयद्रोचतेतद्ग्राह्यं॥ यन्नरोचतेतत्त्याज्यं॥ संकोचतविव

श्रा० र्जितं ॥ सुखेनैव भोक्तव्यं ॥ जुषामहे ॥ श्राद्धं गयाकृतश्राद्धफलमस्तु ॥ यजमानः ॥ सं०
॥२५॥ तथास्तु ॥ पितुः प्रतिसांवत्सरिक श्राद्धे राक्षोघ्नसूक्तानि पितृसूक्तान्याश्रावयिष्ये ॥
आश्रावय ॥ भोजनांते ॥ अपेक्षितं ॥ संपूर्ण ॥ सिद्धस्य हविषो मध्ये यद्गोचलेत्
चयध्वं ॥ अरं ॥ मधुमतीश्रवणं करिष्ये ॥ श्रावय ॥ मधुवाताऽऋतायते मधुक्षरं
ति सिंधवः ॥ माध्वीर्नः संत्वोषधीः ॥ मधु नक्तमुतोषसो मधुमत्पार्थिवं रजः ॥ मधु
द्यौरस्तु नः पिता ॥ मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः माध्वीर्गावो भवंतु नः ॥
प्राचीनावीती ॥ अक्षन्नमीमदंत ह्यव प्रियाऽअधूषत ॥ अस्तोषत स्वभानवो वि
प्रा नविष्ठया मती योजान्विंद्र ते हरी ॥ मम पितुः प्रतिसांवत्सरीक श्राद्धं संपन्नं ॥ सु
संपन्नं ॥ सव्यं ॥ विश्वेदेवाः तृप्ताः स्थ ॥ तृप्ताः स्मः ॥ प्राचीना ॥ पितृपितामहप्र ॥२५॥
पितामहः ॥ तृप्ताः स्थ ॥ तृप्ताः स्मः ॥ शेषमन्नं किं क्रियतां ॥ इष्टैः सह भोज्यतां ॥

विकिरंदद्यात्॥ सव्यं॥ असोमपाश्चयेदेवायज्ञभागविवर्जिताः॥ तेषामन्नं
प्रदास्यामिविकिरंवैश्वदेविकं॥ असोमपेभ्योविश्वेभ्योदेवेभ्यः॥ इदंविकि
रान्नंदत्तंनमम॥ प्राचीना०॥ असंस्कृतप्रमीतायेत्यागिन्योयाःकुलस्त्रियः॥
दास्यामितेभ्योविकिरमन्नंताभ्यश्चपैतृकं॥ कुमारकुमारिभ्यः॥ इदंप्रकिरा
न्नंदत्तंनमम॥ येऽअग्निदग्धायेऽअनग्निदग्धामध्येदिवःस्वधयामादयं
ते॥ तेभिःस्वराळसुनीतिमेतांयथावंशंतन्वंकल्पयस्व॥ येअग्निदग्धे
भ्यः॥ येअनग्निदग्धेभ्यः॥ अस्मत्कुलप्रसुतेभ्यः॥ जीवेभ्यः॥ उच्छि
ष्टपिंडस्वधा॥ अग्निदग्धाःकुलेजातायेप्यदग्धाःकुलेमम॥ भूमौदत्तेनपिं
डेनतृप्तायांतपरांगतिं॥ उच्छिष्टपिंडोगयास्थोदत्तोनमम॥ सव्यं॥ हस्तौ
पादौप्रक्षाल्य द्विराचम्य॥ पवित्रंवंतःपरिवाच्य०॥ इतिपवित्रंधृत्वा॥

 उच्छिष्टभागेभ्योनंदीयतां॥ यजमानकुलेजातादासादास्योंन्नकांक्षिणः॥
 तेसर्वेतृप्तिमायांतुमयादत्तेनभूतले॥ प्राचीना०॥ उत्तरापोशानंपितृपूर्वकं
दद्यात्॥ सव्यं॥ अद्यपूर्वो० फलप्राप्त्यर्थं पितुःप्रतिसांवत्सरिकश्राद्धे
पिंडप्रदानंकरिष्ये॥ कुरुष्व॥ अमृतापिधानमसि॥ प्राचीना०॥ दक्षिण
आग्नेयमध्ये॥ अपाहतासुराक्षांसिवेदिषदः॥ तामभ्युक्ष्य॥ सकृदाच्छि
न्नैर्दर्भैरवस्तीर्य॥ शुंधंतांपितरः॥ शुंधंतांपितामहाः॥ शुंधंतांप्रपिता
महाः॥ एतत्तेअस्मत्पितः अमुकशर्मन् अमुकगोत्रान् वसुरुद्रादि
त्यस्वरूपान्येचत्वामत्रानु पित्रेअमुकशर्मणे अमुकगोत्रायवसुरूपायअ
यंपिंडःस्वधानमः॥ तेभ्यश्चगयायांदत्तमस्तु॥ अस्मत्पितामह॥ अमुक
शर्मन अमुकगोत्र वसुरुद्रा०॥ अस्मत्पितामहायअमुकशर्मणेअमु

कगोत्राय वसुरूपाय अयं पिंडः स्वधा नमः॥ तेभ्यश्च गयायां दत्तमस्तु॥ अ
स्मत्प्रपितामह अमुकशर्मन् अमुकगोत्रं आदित्यरूपं ये च त्वामत्रानु॥ अ
स्मत्प्रपितामहाय अमुकशर्मणे अमुकगोत्राय आदित्यरूपाय अयं पिंडः
स्वधा नमः॥ तेभ्यश्च गयायां दत्तमस्तु॥ अत्र पितरो मादयध्वं॥ यथाभा
गमावृषायध्वं॥ इत्यनुमंत्र्य सव्यावृदुदङ्‌वृत्य यथाशक्त्य प्राणं नासित्वां॥
अमीमदंत पितरो यथागमावृषायीषत॥ चरोः प्राणभदनं भदनयेत्॥ उपवी
ति॥ पिंडशेषं माघ्राय॥ हस्तं प्रक्षाल्य॥ आचम्य॥ प्राचीना०॥ शुंधंतां पित
रः॥ शुंधंतां पितामहाः॥ शुंधंतां प्रपितामहाः॥ अस्मत्पितः अभ्यंक्ष्व॥ अ
स्मत्पितामह अभ्यंक्ष्व॥ अस्मत्प्रपितामह अभ्यंक्ष्व॥ अस्मत्पितः॥ अं
क्ष्व॥ अस्मत्पितामह अंक्ष्व॥ अस्मत्प्रपितामह अंक्ष्व॥ अंकं क्ष्वेति कज्ज

लं॥ एतद्वः पितरोवासोमानोतोन्यत्पितरोयुङ्ध्वं॥ इतिमंत्रेणपंचाशद्वर्षता सं०
याऊर्ध्वंस्वदक्षोमेः॥ दशासूत्रांवातिलाक्षतान्॥ रनव्यं॥ कुलाभिवृध्यर्थंसन
व्येनपिंडपूजांकरिष्ये॥ पिंडस्थापितरः॥ पाद्यंस्वधा॥ पिंडसंस्थापितरः
अर्घ्यंस्वधा०॥ पिंडसंस्थापितरः॥ आचमनीयंस्वधा॥ पिंड० स्नानंस्वधा॥
पिंडसंस्थापितरः आचमनीयंस्वधा॥ पिंड० वस्त्रंस्वधा॥ पिंड० यज्ञोपवीतं
स्वधा॥ पिंड० विलेपनार्थेचंदनंस्वधा॥ पिंड० अलंकारार्थेतिलाक्षतान्
यवाक्षतान्स्वधा॥ पिंड० पुष्पंस्वधा॥ पिंड० तुलसीपत्रंस्वधा॥ पिंड०
भृंगिराजपत्रंस्वधा॥ पिंड० धूपंस्वधा॥ पिंड० दीपंस्वधा॥ पिंडसंस्थापि
तराः नैवेद्यंस्वधा॥ पिंड० उरः० हस्त० मुख० करोद्वर्तनार्थेचंदनंस्वधा० ॥१८॥
पिंड० मुखवा० तांबुलं०॥ पिंड० सुवर्णपुष्पदक्षिणांस्वधा॥ प्राचीना०॥

उपलिप्तेतां ॥ तिलयवाच्छदोहारन्सौगृहित्वा ॥ विकीरयेत् ॥ नमोवःपितं
रइषेनमोवःपितरऊर्जेनमोवःपितरःशुष्मायनमोवःपितरोघोराय
नमोवःपितरोजीवायनामोवःपितरोरसाय ॥ स्वधावःपितरोनमोवःपि
तरोनमएतायुष्माकंपितरइमाअस्माकंजीवावोजीवंतइहसंतस्या
म ॥ मनोन्वाहुवामहेनाराशंसेनसोमेन ॥ पितॄणांचमन्मभिः ॥ आतए
तुमनःपुनक्रत्वेदक्षायजीवसे ॥ ज्योक्चसूर्यंदृशे ॥ पुनर्नःपितरोमनोददा
तुदैव्योजनाः ॥ जीवंव्रातंसचेमहि ॥ परेतुनपितरःसोम्यासोगंभीरेभिः
पथिभिःपूर्विणेभिः ॥ दत्वायास्मभ्यंद्रविणेहभद्रंरयिंचनःसर्ववीरंनियच्छं
त ॥ वीरमेदत्तपितरः इतित्रिः ॥ सव्यं ॥ शिवापःसंतु ॥ संतुशिवापः ॥ सौ
मनस्यमस्तु ॥ अस्तुसौमनसीयं ॥ यवाःपांतु ॥ पांतुय वाः ॥ दीर्घमायुःश्रेयः

श्रा० शांतिः पुष्टिस्तुष्टिश्चास्तु ॥ दीर्घमायुः श्रेयः शांतिः पुष्टिस्तुष्टिश्च ॥ प्राचीना० सं०
१८ शिवापः संतु ॥ संतु शिवापाः ॥ सौमनस्यमस्तु ॥ अस्तु सौमनीयं ॥ तिलाः
पांतु ॥ पांतु तिलाः ॥ दीर्घमायुः श्रेयः शांतिः पुष्टिस्तुष्टिश्चास्तु ॥ दीर्घमा
युः श्रेयः शांतिपुष्टिस्तुष्टिश्च ॥ स्थानमसि ॥ तद्विष्णोः परमं पदं सदा पश्यं
ति सूरयः ॥ दिवीव चक्षुराततं ॥ तद्विप्रासो विपन्यवो जागृवांसः समिंध
ते ॥ विष्णोर्यत्परमं पदं ॥ अस्मत्पितृपितामहप्रपितामहानां ॥ अमुकशर्म
णां अमुकगोत्राणां वसुरुद्रादित्यस्वरूपाणां ॥ यद्दत्तं प्रतिसांवत्सरिकश्रा
द्धीयमन्नमुदकादि तदक्षय्यमस्त्विति भवंतो ब्रुवंतु ॥ अस्त्वक्षय्यं ॥ श्राद्धी
यमन्नमुदकं ॥ सव्यं ॥ विश्वेषां देवानां यद्दत्तं प्रतिसांवत्सरिकश्राद्धीयम १८
न्नमुदकादि तदक्षय्यमस्त्विति भवंतो ब्रुवंतु ॥ अस्त्वक्षय्यं ॥ देवानां सुवर्ण ॥

पितॄणां रजतं ॥ श्राद्धभुक्तेभ्यो ब्राह्मणेभ्यः ॥ इमां दक्षिणां तुभ्यमहं संप्रद
दे ॥ दक्षिणाः पांतु ॥ पांतु दक्षिणः ॥ प्राचीना० ॥ स्वधां वाचयिष्ये ॥ वाचतां ॥
अस्मत्पितृपितामहप्रपितामहेभ्यः ॥ स्वधोच्यतां ॥ अस्तु स्वधा ॥ स्वधा संप
द्यंतामिति भवंतो ब्रुवंतु ॥ संपद्यतां स्वधा ॥ सव्यं ॥ अग्निपुरोगा विश्वेदेवाः प्री
यंतामिति भवंतो ब्रुवंतु ॥ प्रीयंतां विश्वेदेवाः ॥ प्राचीना० ॥ वसुपुरोगाः पितरः
प्रीयंतामिति भवंतो ब्रुवंतु ॥ प्रीयंतां पितरः ॥ सव्यं ॥ सर्वे स्वस्तीति भवंतो ब्रु
वंतु ॥ आयुष्मतेः स्वस्ति ॥ शोभनं हविः ॥ आत्मालंकारः ॥ शाकपाकाः पि
तरः प्रियाः ॥ उत्तमोत्तमाः ॥ पिंडान्नमस्कृत्य ॥ अघोराः पितरः संतु ॥ संत्व
घोराः पितरः ॥ गोत्रं वर्धतां ॥ दातारो नोभिवर्धतां वेदाः संततिरेव नः ॥ श्र
द्धा च नो मा व्यगमत् बहुधेयं च न मोस्तु ॥ अन्नं च नो बहु भवेत् ॥ अतिथींश्च

लभेमहि॥ याचतारश्च नः संतु मा च याचिष्म कंचन॥ दातारो वोभिवर्धंतां वे
दाः संततिरेव वः॥ श्रद्धा च वो मा व्यगमत् बहु देयं च वोस्तु॥ अन्नं च वो बहु
भवेत्॥ अतिथींश्च लभध्वं॥ याचतारश्च वः संतु॥ मा च याचिढ्वं कंचनः॥ स्व
स्तिं गोत्रं गोत्रस्याभिवृद्धिरस्तु॥ देवपितृप्रसादोस्तु॥ श्राद्धं गयाकृतश्रा
द्धफलमस्तु॥ मध्यपिंडोद्धारणं करिष्ये॥ उद्धारय॥ तद्विष्णोः परमंप
दं॥ अयोध्या मथुरा माया काशी कांची अवंतीका॥ पुरि द्वारावती चैव स
प्तैता मोक्षदायकाः॥ पिंडस्थाने शांतिः पुष्टिस्तुष्टिश्चास्तु॥ स्वरस्थाने वासः॥
प्राचीना०॥ वाजेवाजेभिर्वीस्सिष्ठो वाजिनारिन्नष्टुप॥ श्राद्धविसर्जने वि
नियोगः॥ वाजेवाज वत वाजिनो धनेषु विप्रा ऽ अमृता ऽ ऋतज्ञाः॥ अ
स्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः॥ उत्तिष्ठंतु पितरः॥

सव्येनविश्वेदेवैःसह॥ आमावाजस्यप्रसवोजगंम्याद्यावापृथिवीविश्वशं
भू॥ आमागंतांपितरामातराचामासोमोऽमृतत्वायगम्यात्॥ स्वादुषंस
दपितरोवयोधाः कृच्छ्रेश्रितःशक्तीवंतोगंभीराः॥ चित्रसेनाऽइषुवलाऽ
मृध्राःसतोवीराऽउरवोव्रातसाहाः॥ ब्राम्हणासःपितरःसोम्यासःशिवे
नोद्यावापृथिवीऽअनेहसा॥ पुषानःपातुदुरितादृतावृधोरक्षामाकिर्नोऽ
अघशंसऽईशत॥ इहैवस्तंमावियौष्टंविश्वमायुर्व्यश्नुतं॥ क्रीडंतौपुत्रैर्नप्तृ
भिर्मोदमानौस्वेगृहे॥ आयुःप्रजांधनंविद्यांस्वर्गंमोक्षंसुखानिच॥ प्रय
च्छंतुतथाराज्यंपितानृणांपितामहाः॥ एताःसत्याआशिषःसंतु॥ अद्य
मेसफलंजन्मभवत्पादाब्जवंदनात्॥ अद्यमेवंशजाःसर्वेयातावोनुग्र
हादिवं॥ यत्तुशास्त्रादिदानेनक्लेशितायूयमेदृशा॥ तत्क्लेशजातचित्ता

श्रा० स्तुविस्मृत्य क्षंतुमर्हथ ॥ विस्मृत्य क्षामः ॥ मंत्रहीनं क्रियाहीनं भक्तिहि सं०
॥२०॥ न द्विजोत्तम ॥ श्राद्ध संपूर्णतां यातु प्रसादाद्भवतां मम ॥ श्राद्ध यज्ञ सं
पुर्णमस्तु ॥ यः कश्चित् श्राद्धयज्ञस्य प्रोक्तो मन्वादिभिर्विधिः ॥ असौ युष्म
प्रसादेन संपुर्ण सकलोऽस्तु मे ॥ अस्तु संपूर्ण फलः ॥ शेषोऽप्यस्ति ॥ हूयतां
इष्टैःसह भोजतां ॥ वसिष्ठासः पितृवद्वाचमक्रत देवां ऽ ईळाना ऽ ऋषिव
त्स्वस्तये ॥ प्रीता ऽ इव ज्ञातयः काममेत्यास्मै देवासोऽव धूनुता वस्नु ॥ देवा
न्वसिष्ठो ऽ अमृतान्ववंदे ये विश्वा भुवनाभि प्रतस्थुः ॥ ते नो रासंतामुरु
गायमद्य यूयं पात स्वस्तिभिः सदा नः ॥ इदं पितृभ्यो नमो ऽस्त्वद्ये तिन्नमस्का
र वलीमंतलः शंसतिलदस्मादं ततः पितृभ्यो नमस्क्रियते तदाहुर्व्याहावं पि ॥२०॥
त्र्याः शंसेत् ॥ अव्याहावां ऽ इति ॥ व्याहाव मवशंसेद संस्थितं वै पितृयज्ञस्य

साध्वसंस्थितं वाएषपितृयज्ञंसस्थापयतियोव्याहावंशंसनितस्मादयांहा
वमेवशंरत्नव्यं॥ जपछिद्रं तपछिद्रं यछिद्रं श्राध्दकर्मणि॥ सर्वंभवतुमेछि
द्रं ब्राम्हणानांप्रसादतः॥ सर्वमछिद्रंभवतु॥ एषपितृयज्ञः॥ तत्सद्ब्रम्हा
र्पणमस्तु॥ अग्नौकर्णब्राम्हणभोजनपिंडदानकर्मणायात्मकेनभगवान्पितरः
स्वरूपीजनार्दनवासुदेवः प्रीयतांनमम॥ तत्सद्ब्रम्हार्पणमस्तु॥ वषट्
तेविष्णवास ऽआकृणोमितन्मेजुषस्वशिपिविष्टहव्यं॥ वर्धंतुत्वासुष्टुत
योगिरोमेयुयंपातस्वस्तिभिः सदानः॥ विष्णवेनमोविष्णवेनमोविष्णवे
नमः॥ ॥ आब्रम्हणोयेपितृवंशदातामातुस्तथावंशभवामदियः॥ वंश
द्वयेस्मिन्ममदासभूताभृत्यास्तथैवाश्रितसेवकांश्च॥१॥ मित्राणिसख्युः
पशवश्चवृक्षाघृष्टाश्चस्पृष्टाश्चकृतोपकाराः॥ जन्मांतरंयेममसंगताश्चतेभिः

श्रा० स्वधापिंडमहंददामि॥२॥ पितृवंशेमृतायेच मातृवंशेतथैवच॥ गुरुश्वशुर सं०
॥२१॥ बंधूनांयेचान्येबांधवास्मृताः॥ ३॥ इमेकुलेलुप्तपिंडाःपुत्रदाराविवर्जिताः
क्रियालोपगताश्चैवजात्यंधाःपंगवस्तथा॥ ४॥ विरूपाआमगर्भाश्चज्ञाता
घ ज्ञाताकुलेनहि॥ धर्मपिंडमयादत्तोअक्षय्यमुपतिष्ठतु॥ ५॥ शमिपत्रप्रमाणे
नपिंडदद्यागयाशिरः॥ उद्धरेत्सप्तगोत्राणिकुलमेकोत्तरंशतं॥ ६॥ अत्रपि
तोमादयइव॥ इतिश्राद्धसंकल्पसमाप्तः॥ शके१८३१ सौम्यनामसंवत्सरेद
क्षिणायनेवर्षाऋतुश्रावणेमासेशुक्लपक्षेपंचम्यांतिथौमंदवासरेतदिनंपुरतकंस
माप्तं॥ छ ॥ छ ॥ छ ॥ छ ॥ हारलअक्षरआपाजिकेशवसातपु
लेवारलव्यमोजेधानेपयानिलिहिलेअसे॥ तैलाद्रक्षेजलाद्रक्षेद्रक्षेत्स्थिथिल ॥२१॥
बंधनात्॥ मूर्खहस्तेनदातव्यंएवंवदतिपुस्तकं॥ समाप्त॥ छ ॥ छ ॥ छ ॥

श्रा०
॥२२॥

॥ इति श्राद्धसंकल्प समाप्तः ॥

सं०
॥२२॥

[OrderDescription]
,CREATED=05.10.19 14:28
,TRANSFERRED=2019/10/05 at 14:38:13
,PAGES=47
,TYPE=STD
,NAME=S0001982
,Book Name=M-476-SHRADHH SANKALP
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF

FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF

FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF

FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,